योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०७९

एकोनाशीतितमः सर्गः ७९

श्रीवसिष्ठ उवाच ।

एतस्मिन्नन्तरे चक्षुर्व्योमस्थोऽहमथात्यजम् ।

ब्रह्मलोके महालोके प्रभातेऽर्कप्रभामिव ।। १

यावद्दृष्टो मया तत्र शैलादिव विनिर्मितः ।

परमेष्ठी समाधिस्थः प्रधानपरिवारवान् ।। २

समूहश्चैव देवानां मुनीनां भावितात्मनाम् ।

शुक्रो बृहस्पतिश्चैव शक्रो वैश्रवणो यमः ।। ३

सोमोऽथ वरुणोऽग्निश्च तथान्येऽपि सुरर्षयः ।

देवगन्धर्वसिद्धानां साध्यानां च विनायकाः ।। ४

लिपिकर्मार्पिताकाराः सर्वे ध्यानपरायणाः ।

बद्धपद्मासनास्तत्र निर्जीवा इव संस्थिताः ।। ५

अथ ते द्वादशादित्यास्तमेवोद्देशमागताः ।

बद्धपद्मासनास्तस्थुस्तथैवाशु यथैव ते ।। ६

ततो मुहूर्तमात्रेण दृष्टवानहमब्जजम् ।

पुरो विनिद्रतां यातः स्वप्नदृष्टमिवाग्रगम् ।। ७

ब्रह्मलोकजनं सर्वं महतामिव वासनाम् ।

नापश्यं स्वप्ननगरं बुध्यमान इवाग्रगम् ।। ८

अरण्यशून्यमेवासीत्तद्ब्रह्ममननं तदा ।

कठिनाकाण्डविध्वस्तं पृथिव्यामिव पत्तनम् ।। ९

सर्व एव न च क्वापि ते तथा तादृशास्तदा ।

ऋषयो मुनयो देवा वेदा विद्याधरादयः ।। १०

ज्ञातं ततोऽवधानेन मया नभसि तिष्ठता ।

यावन्निर्वाणमापन्ना ब्रह्मवत्सर्व एव ते ।। ११

वासनायां विलीनायामदर्शनमुपागताः ।

स्वप्नलोकाः प्रबुद्धानामिव स्वं रूपमागताः ।। १२

आकाशात्मैव देहोऽयं भाति वासनया स्फुटः ।

तदभावात्तु नो भाति स्वप्नो बोधवतो यथा ।। १३

अन्तरिक्षगतो देहो यथा स्वप्ने विलोक्यते ।

बोधे तद्वासनाशान्तौ न किंचिदपि लक्ष्यते ।। १४

जाग्रत्यपि तथैवायं वासनायाः परिक्षये ।

नैवातिवाहिको नैव लक्ष्यतेऽत्राधिभौतिकः ।। १५

स्वप्नानुभव एषोऽत्र दृष्टान्तत्वेन लक्ष्यते ।

आबालमेतत्संसिद्धमनुभूतं श्रुतं स्मृतम् ।। १६

अपह्नुते च वा योऽपि स्वमेवानुभवं शठः ।

स त्याज्यः को ह्यलीकेन सुप्तमुद्बोधयेत्किल ।। १७

देहकारणकः स्वप्नो देहाभावान्न दृश्यते ।

इति चेत्तददेहानां परलोकोऽपि नास्ति च ।। १८

इत्येतदभविष्यच्चेत्तच्छरीरकसंक्षये ।

नाभविष्यदयं सर्गः स चास्त्येव च सर्वदा ।। १९

अवयवविभागात्मन्यवश्यंभाविनि क्षये ।

न कदाचिदनित्थं तज्जगदित्यप्यसंस्थितम् ।। २०

न कदाचिज्जगन्नाशो देहोद्भूतगुणादिकम् ।

मदशक्तिरिव ज्ञप्तिरुदेतीति च वक्षि चेत् ।। २१

तत्पुराणेतिहासानां सर्वसंक्षयवादिनाम् ।

स्मृत्यादीनां सवेदानां वैयर्थ्यमुपजायते ।। २२

अप्रमाणतयैतस्मिन्नर्थे तेषां महामते ।

अन्यत्राणि प्रमाणत्वं वन्ध्यादावपि किं भवेत् ।। २३

न चैतदिष्यते लोके जगदुच्छेदकारणात् ।

अन्यच्चास्तामेतदङ्ग ममेदमपरम श्रृणु ।। २४

मदशक्त्यात्मनि ज्ञाने दृष्टा देशान्तरेषु या ।

प्रसृतानां पिशाचादिदेहता सा न सिध्यति ।। २५

अथ सापि मुधा भ्रान्तिर्यावद्देहं प्रदृश्यते ।

इति चेत्तन्मुधा नाम सत्यमित्येव वो भवेत् ।। २६

एवं चेत्तत्परो लोकः सत्स्वर्गनरकादिकम् ।

इत्येषापि न संवित्किं सत्यतामुपगच्छति ।। २७

न पिशाचप्रमा सत्या मदशक्तिमतोऽपि हि ।

प्रतिभास्य न सत्या स्यात्परलोकात्मिका कथम् ।। २८

पिशाचोऽस्तीति चेत्संवित्सत्यार्था तेन संविदः ।

मृतस्यास्ति परो लोक इत्यस्यां किं न सत्यता ।। २९

काकतालीयवद्देहात्पैशाची ज्ञप्तिरस्ति चेत् ।

परलोकार्थसंवित्तिः कथं नास्ति सकारणा ।। ३०

यान्तर्वेत्ति यथा संवित्सा तथानुभवत्यलम् ।

अस्तु सत्यमसत्यं वा सिद्धमित्यनुभूतितः ।। ३१

मृतस्यास्ति परो लोको विदित्येवंमयी भवेत् ।

सति वाऽसति देहेऽस्मिंस्तेन किं सदसच्च किम् ।। ३२

तस्मात्स्वभावः प्रथमं प्रस्फुरन्वेत्ति संविदम् ।

वासनाकारणं पश्चाद्बुद्ध्वा संपश्यति भ्रमम् ।। ३३

तत्क्षयाच्छममायाति द्रष्टृदृश्यदृगामयः ।

तत्सत्तायामुदेतीयं संसृत्याख्या पिशाचिका ।। ३४

उपलम्भ उदेत्यादौ ब्रह्मणो वासना ततः ।

तच्छान्तिं विद्धि निर्वाणं तत्सत्तां संसृतिभ्रमम् ।। ३५

उत्पन्नैव च सानादौ परब्रह्मण्यसंभवात् ।

उत्पन्ना समयाद्यासौ ब्रह्मैव परमेव सत् ।। ३६

एतावद्यत्परिज्ञानं तन्निर्वाणं विदुर्बुधाः ।

यदत्रैवापरिज्ञानं तं बन्धं विद्धि राघव ।। ३७

विज्ञानघन एवायं कचनाकचनात्मकः ।

स्वयमेव कचत्यन्तर्न कचत्येव वा स्वयम् ।। ३८

संविदंशपरावृत्तिमात्रे पेलवरूपिणि ।

बन्धदृङ्मोक्षदृक् चेति क्लेशस्तत्साधनं कियत् ।। ३९

संविदुद्बोधने बन्धस्तदनुद्बोधने शिवम् ।

असत्सद्वज्जगद्भाति संविदुद्बोधनोदरम् ।। ४०

अजडं वेदनं सुप्तं मोक्ष इत्यभिधीयते ।

प्रबुद्धं बन्ध इत्याहुर्यदिच्छसि तदाहर ।। ४१

निर्वाणवासनमनन्तमनाद्यमच्छ-

बोधैकतानमपयन्त्रणमस्तशङ्कम् ।

अद्वैतमैक्यरहितं च निरस्तशून्य-

माकाशकोशविशदाशयशान्तमास्व ।। ४२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वा० उ० पा० वासनाभावप्रतिपादनं नामैकोनाशीतितमः सर्गः ।। ७९ ।।